Civil Services (Main)
Examination, 2026

KVMS–D–SNKT

संस्कृतम्

द्वितीयं प्रश्नपत्रम्

(साहित्यम्)

समयः होरात्रयम् (घण्टा-त्रयम्) | पूर्णाङ्काः 250

प्रश्नपत्र-सम्बन्धिताः विशेषनिर्देशाः

कृपया प्रश्नोत्तरलेखनात् पूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः

खण्डद्वये विभाजिताः **अष्टौ** प्रश्नाः।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः।

प्रथम-पञ्चमौ प्रश्नौ अपरिहार्यौ। अवशिष्टेषु प्रश्नेषु **त्रयः** प्रश्नाः समाधेयाः। प्रतिखण्डम् **एकः** प्रश्नः अवश्यं ग्रहणीयः।

प्रश्नानां तद्भागानां वा मूल्याङ्काः प्रश्नस्थले एव निर्दिष्टाः।

चतुर्थ-पञ्चम-षष्ठप्रश्नाः संस्कृतभाषायां देवनागरीलिप्या समाधेयाः। अवशिष्टप्रश्नानामुत्तरं संस्कृतभाषायां देवनागरीलिप्या अथवा परीक्षाप्रवेश-प्रमाणपत्रे स्वीकृतया कयाचिद्भाषया प्रदेयम्।

प्रश्नोत्तरार्थं निर्दिष्टा पदानां संख्या परिपालनीया।

यदि प्रश्नोत्तरपुस्तिकायां कोपि पृष्ठः अंशो वा रिक्तः (अलिखितः) स्यात्तर्हि तत्र स्पष्टरूपेण व्यत्यासचिह्नं (×) विधेयम्।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भवेत्।

SANSKRIT

PAPER—II

(LITERATURE)

Time Allowed : Three Hours | Maximum Marks : 250

QUESTION PAPER SPECIFIC INSTRUCTIONS

Please read each of the following instructions carefully before attempting questions

There are EIGHT questions divided in TWO Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **4**, **5** and **6** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.

Optional Province · optionalprovince.com

खण्ड—A / SECTION—A

1. अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं प्रत्येकं सार्धशतेन (*150*) शब्दैः विधीयताम्—

Each answer along with examples of the following questions to be written within *150* words : 10×5=50

(a) ''प्रियाङ्कपालीव विमर्दहृद्या न कालिदासादपरस्य वाणी'' सूक्तिरेषा युक्तैः उदाहरणैः साध्या।

Enumerate the phrase ''प्रियाङ्कपालीव विमर्दहृद्या न कालिदासादपरस्य वाणी'' with apt examples.

(b) ''नैषधं विद्वदौषधम्'' कथनमेतत् विवरणीयम्।

Elucidate the statement—''नैषधं विद्वदौषधम्''.

(c) ''दण्डिनः पदलालित्यम्'' सुवचनमिदं विशदयत।

Elaborate the utterance—''दण्डिनः पदलालित्यम्''.

(d) ''मेघे माघे गतं वयः'' भणितिमेतां समीक्ष्यताम्।

Critically appreciate the gnome—''मेघे माघे गतं वयः''.

(e) ''वाणी बाणो बभूवेति'' कादम्बरीगतैः युक्तैः उदाहरणैः साधयत सुभाषितमेतत्।

Establish the epigram ''वाणी बाणो बभूवेति'' with apt examples from *Kādambarī*.

2. अधोनिर्दिष्टानां विषयाणां सारगर्भिता समीक्षणीया—

Critically examine the significance of the following questions :

(a) ईशावास्यश्रुतिमनुसृत्य कर्मोवासनयोः समुच्चयं विवृणुत।

Elucidate the conjunction of acts and devotion in accordance with *Īśāvāsyaśruti.* 15

(b) भगवद्गीतामवलम्ब्य स्थितप्रज्ञस्य लक्षणानि प्रतिपादनीयानि।

Expound the characteristics of स्थितप्रज्ञ according to the *Bhagavadgītā.* 20

(c) कौटिल्यमते अमात्यानां शौचाशौचं कथं विद्यात्?

How may the honesty and dishonesty of ministers be ascertained according to Kauṭilya? 15

3. अधोनिर्दिष्टानां विषयाणां समीक्षणं विधेयम्—

Analyze in detail the following questions :

(a) ''मुहुर्लक्ष्योद्भेदा मुहुरधिगमाभावगहना ... मुहुर्भ्रश्यद्बीजा ...'' कथनस्यास्य महत्त्वं निरूपयत।

Elaborate the significance of the expression—''मुहुर्लक्ष्योद्भेदा मुहुरधिगमाभावगहना ... मुहुर्भ्रश्यद्बीजा ...''. 15

Optional Province · optionalprovince.com

(b) ''काव्येषु नाटकं रम्यं, तत्र रम्या शकुन्तला''—सुभाषितमेतत् साध्यम्।

Enumerate the statement—''काव्येषु नाटकं रम्यं, तत्र रम्या शकुन्तला''. 20

(c) ''कारुण्यं भवभूतिरेव तनुते''—सूक्तिमेतां समीक्ष्यताम्।

Examine the dictum ''कारुण्यं भवभूतिरेव तनुते''. 15

4. अधोलिखितानां विवेचनं देवभाषयैव देवनागरीलिप्यामेव च कर्त्तव्यम्—

The answers of the following questions must be written in Sanskrit language and in Devanāgarī script only :

(a) मेघदूतमाधृत्य रामगिरितः अलकापुरीपर्यन्तं मेघगमनमार्गं विवृणुत।

Depict the route of मेघ from Rāmagiri to Alakāpurī as given in 'मेघदूतम्'. 15

(b) नीतिशतके धैर्यस्य विदुषश्च प्रशंसयोः मूल्याङ्कनं विधेयम्।

Evaluate the admiration of patience and scholars as depicted in *Nītiśatakam*. 15

(c) गीतगोविन्दस्य गीतसङ्गीतभक्तीनां त्रिवेणीत्वं साधनीयम्।

Highlight the confluence of poetry, music and devotion in 'गीतगोविन्दम्'. 20

खण्ड—B / SECTION—B

5. नागराक्षरैः संस्कृतभाषायां प्रत्येकं सार्धशतेन (*150*) शब्दैः व्याख्यायताम्—

Explain each of the following verses in Sanskrit language and in Devanāgarī script only (within *150* words) : 10×5=50

(a) वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

(b) न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुञ्जरबिन्दुशोणाः।
व्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम्॥

(c) यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।
यथापराधदण्डानां यथाकालप्रबोधिनाम्॥

(d) श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।
स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः॥

(e) सखीनिव प्रीतियुजोऽनुजीविनः
समानमानान्सुहृदश्च बन्धुभिः।
स सन्ततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम्॥

Optional Province · optionalprovince.com

6. अधोनिर्दिष्टानां व्याख्या नागराक्षरैः संस्कृतभाषायामेव विधेया—

Explain the following verses in Sanskrit language and in Devanāgarī script only :

(a) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥ 15

(b) अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत॥ 20

(c) अश्रुपूर्णमुखीं दीनां कृशामनशनेन च।
शोकध्यानपरां दीनां नित्यं दुःखपरायणाम्॥ 15

7. अधोलिखितानामाशयः ससन्दर्भं प्रतिपादनीयः —

Elaborate the idea of the following verses with reference :

(a) तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥ 15

(b) स्वायत्तमेकान्तगुणं विधात्रा
विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम्॥ 15

(c) आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैः श्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेर्नैष्ठुर्यम्, इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वैवोद्गता। 20

8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या—

Explain the following verses with context :

(a) कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते॥ 15

(b) भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्॥ 15

(c) अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः।
कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते॥ 20

★★★

Optional Province · optionalprovince.com